International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

# याज्ञवल्क्यस्मृतौ प्रतिपादितब्राह्मणधर्माः

**Dr. Bandi Chaitanya Kumar**
**Contract lecturer in Sankrit**
**S.G.V Oriental College.**
**Ph. No. - 9676113384**

## ब्राह्मणधर्माः

याज्ञवल्क्यस्मृतौ मनुस्मृताविव ब्राह्मणधर्माः विस्तरेण निरूपिताः। किन्तु मनुस्मृतौ ये धर्माः ब्राह्मणस्य प्रतिपादिताः ते सर्वे याज्ञवल्क्यस्यापि सम्मताः। यतो ब्राह्मणाः वेदधर्मज्ञाः धर्मनिर्णये प्रमाणं भवन्तीति याज्ञवल्क्यस्स्पष्टमुक्तवान्। धर्मनिर्णय परिषदि चत्वारो ब्राह्मणाः भवेयुरित्यपि निश्चयो दर्शितः। सार्ववर्णिकानां धर्मस्सामान्यरूपः एवं निर्दिष्टः।

**इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम्।**

**अयं तु परमो धर्मोयद्योगेनात्मदर्शनम् ॥**[1]

इज्या स्वाध्यायं दानमिति त्रीणि कर्माणि सार्ववर्णिकानि तदाचरणे देशकालनियमो नास्तीत्यपि मिताक्षरव्याख्यायां दर्शितम् अपि च धर्मपरिषदि चतुर्वेदज्ञास्त्रयो ब्राह्मणाः भवेयुरिति निर्णयेन ब्राह्मणेन वेदाध्ययनमवश्यं कार्यमिति धर्मस्सूचितः धर्मशास्त्रज्ञा अपिब्राह्मणा भवेयुरिति तल्लक्षणं निरूपितम्।

**चत्वारो वेदधर्मज्ञाःपर्वत्रैविद्यमेव वा।**

**सा ब्रूते यं स धर्मः स्यादेको वाऽध्यात्मवित्तमः॥**[2]

वेदज्ञाः धर्मज्ञाः इति वेदधर्मज्ञाः त्रैविद्याः इत्यत्र वेदस्य धर्मस्य शास्त्रस्य च तत्त्वं ये जानन्ति ते त्रैविद्याः इति मिताक्षरायां स्पष्टम्। अध्यात्मज्ञानेषु निपुणतमो वेदधर्मज्ञः शास्त्रज्ञश्च एकोऽपि वा अयं ब्रूते स धर्मः त्रयाणामभावे एक

इत्यर्थः।ब्रह्मचारिप्रकरणे स्मृत्युक्ताः संस्काराः यस्य भवन्ति स ब्राह्मणः इत्यपि निरूपितः।

**गर्भाधानमृतौ पुंसःसवनं स्यन्दनात् पुरा।**

**षष्ठेऽष्टमे वा सीमन्तोमास्येते जातकर्म च ॥**

**अहन्येकादशे नामचतुर्थे मासि निष्क्रमः।**

**षष्ठेऽन्नप्राशनं मासिचूडा कार्या यथाकुलम् ॥**[3]

ब्राह्मणेन मद्यपानं न कुर्यादित्यादि सर्वे नियमाः धर्मशास्त्रान्तरग्रन्थादवगन्तव्याः इतिमिताक्षरया गम्यते।

विद्याभ्यासप्रसङ्गे ब्राह्मणेन अध्येयाः विद्याः, तत्प्रयोजनं च व्याख्यासु निरूपितम्। ब्राह्मणेन चतुर्दशविद्याः धर्मानुष्ठानार्थमेव अध्येतव्याः, विद्याप्राप्तये च शास्त्रज्ञस्य ब्राह्मणस्य धर्मनिर्णये अधिकारो भवति प्रवचने च। एवं ब्राह्मणशब्दो वर्णपर्यायः याज्ञवल्क्यस्मृतौ मिताक्षराव्याख्यायाः बालभट्टीयव्याख्यायां च सममेतत् स्पष्टम्।

**पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।**

**वेदाः स्थानानि विद्यानांधर्मस्य च चतुर्दश ॥**[4]

पुराणं ब्राह्मादिन्यायस्तर्कविद्या मीमांसा वेदवाक्यविचारो धर्मशास्त्रं मानवाद्यङ्गानि व्याकरणादीनि षट् एतैरुपेताश्चत्वारो वेदाः विद्याः पुरुषार्थसाधनज्ञानानि, तासां स्थानानि च चतुर्दश धर्मस्य च चतुर्दश स्थानानि हेतवः एतानि च त्रैवर्णिकैरध्येतव्यानि तदन्तर्भूतत्वात् धर्मशास्त्रमप्यध्येतव्यम्। तत्रैतानि ब्राह्मणेन विद्याप्राप्तये धर्मानुष्ठानाय चाधिगन्तव्यानि, क्षत्रियवैश्याभ्यां धर्मानुष्ठानाय तथा च शङ्खेन विद्यास्थानान्यनुक्रम्योक्तम्- 'एतानि ब्राह्मणोऽधिकुरुते स वृत्तिं

दर्शयतीतरेषाम्' इति। मनुरपि द्विजातीनां धर्मशास्त्राध्ययनेऽधिकारः, ब्राह्मणस्य प्रवचने, नान्यस्येति दर्शयति। 'निषेकादिश्मशानान्ते मन्त्रैर्यस्योदितो विधिः तस्य शास्त्रेऽधिकारो ऽस्मिन् ज्ञेयो नान्यस्य कस्यचित् ' ॥

'विदुषा ब्राह्मणेनेदमध्येतव्यं प्रयत्नतः शिष्येभ्यश्च प्रवक्तव्यः सम्मनान्येन केनचित्।'इतिअपरार्का व्याख्या :-'ज्ञानपूर्वमनुष्ठानं धर्मस्येति धर्मज्ञानोपायांस्तावदाह पुराणेति।

वेदाः ऋग्वेदादयः। एतानि चतुर्दश ज्ञानानां निमित्तानि धर्मस्य च ज्ञानद्वारेण। एतत् उत्पन्नस्यैव ज्ञानस्य धर्महेतुत्वात्। तस्य प्रयोगपद्धत्यादिसमुत्थितं ज्ञानं धर्महेतुरिति सिद्धम् एवं चतुर्दशैतानि विद्यास्थानानि सन्त्यथ।'वेदान्तः पञ्चदशकं विद्याषोडशिका भवेत्।' इति ब्रह्मपुराणे यद् वेदान्तविद्ययोर्ग्रहणं तन्मोक्षसाधनस्थानाभिप्रायः इहानुपयोगित्वान्नोक्तम्। वेदान्तः शारीरकम्। विद्या बृहदारण्यकादिरहस्यम्। युक्तंविष्णुपुराणम्।

**अङ्गानि वेदश्चत्वारोमीमांसा न्यायविस्तरः।**

**पुराणं धर्मशस्त्रं चविद्या ह्येताश्चतुर्दश ॥**

**आयुर्वेदो धनुर्वेदोगान्धर्वश्चेति ते त्रयः**

**अर्थशास्त्रं चतुर्थं चविद्या अष्टादशैव ताः ॥ इति।**

**तत्केवलं विद्यास्थानं त्वाभिप्रायं न धर्मस्थानत्वाभावात्। चतुर्दशग्रहणादृतेअर्थवेदसंग्रहो न स्यात् इति।**[5]

ब्राह्मणो क्षत्रियैः पोषणीयो रक्षणीयश्च। यद्यप्येष क्षत्रियधर्मे अन्तर्भवति तथापि ब्राह्मणस्य वृत्तिहेतुरिति अत्राप्युदाह्नियते। आचाराध्याये ब्राह्मणस्य षट्कर्मार्हत्वमपि उपपादितम्।स्वयंकृतं कृषिवाणिज्यं च कार्यमिति व्याख्यासु स्पष्टम्।

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

**इज्याध्ययनदानानिवैश्यस्य क्षत्रियस्य च।**

**प्रतिग्रहोऽधिको विप्रेयाजनाध्यापने तथा ॥**[6]

याजनाध्यापनप्रतिग्रहाः यद्यपि ब्राह्मणस्य सार्वकालिकाः इति मनुना गौतमेन च अङ्गीकृताः याज्ञवल्क्यस्य आपद्येव ब्राह्मणस्य षट्कर्माणि सम्मतानीति मिताक्षरायां स्पष्टमुक्तम्।

**वैश्यस्य क्षत्रियस्य च चकाराद् ब्राह्मणस्य द्विजानुलोमानांच, यागाध्ययनदानानि साधारणानि कर्माणि, ब्राह्मणस्याधिकानि प्रतिग्रहयाजनाध्यापनानि। तथेति स्मृत्यन्तरोक्तवत्त्युपसंग्रहः, यथाऽह गौतमः - 'कृषिवाणिज्ये वा स्वयंकृते', 'कुसीदं च' इति। अध्यापनं तु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर्भवति, न स्वेच्छया- 'आपत्काले ब्राह्मणस्याब्राह्मणाद्विद्योपयोगः। अनुगमनं शुश्रूषा। समाप्ते ब्राह्मणो गुरुः।' इति गौतमस्मरणात्। एतान्यनापदि ब्राह्मणस्य षट्कर्माणि। तत्र त्रीणीज्यादीनि धर्मार्थानि प्रतिग्रहादीनि वृत्त्यर्थानि 'षण्णां तु कर्मणामस्य त्रीणि कर्माणि जीविका। याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः।' इति मनुस्मरणात्। अत इज्यादीन्यवश्यं कर्तव्यानि न प्रतिग्रहादीनि। 'द्विजातीनामध्ययनमिज्यादानम्।' 'ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः', 'पूर्वेषु नियमः ' इति गौतमस्मरणात्।**[7]

स्नातको ऽपि ब्राह्मणो याजनाध्यापनप्रतिग्रहैर्जीवनं नयेत् किन्तु ये च याजनाध्यापन प्रतिग्रहाः वेदधर्मविरोधिनो भवन्ति ते वर्जनीयाः। वेदनिन्दकेभ्यो धनं न ग्रहणीयम्। गर्ववान् न भवेदित्यादि ब्राह्मणजीवनवृत्तिधर्माः स्नातकप्रकरणे प्रतिपादिताः। अपि च ब्राह्मणः केवलंलोकरञ्जनार्थं कर्मानुष्ठायै भवेत् इति मनोः वाक्योदाहरणपूर्वकं ब्राह्मणस्य वृत्तिः याज्ञवल्क्यस्मृती व्याख्यायामपि निरूपितम्।

**न स्वाध्यायविरोध्यर्थमीहेत न यतस्ततः।**

**न विरुद्धप्रसंगेनसन्तोषी च भवेत्सदा॥**

ब्राह्मणस्य प्रतिग्रहादयो ऽर्थप्राप्त्युपाया दर्शिताः, तत्र विशेष उच्यते। स्वाध्यायविरोधिनमर्थम् अप्रतिषिद्धमपि नेहेत नान्विच्छेत्। न यतस्ततः न यतः कुतश्चित् - अविदिताचारा विरुद्धप्रसंगेन, विरुद्धमयाज्ययाजनादिप्रसंगो। नृत्यगीतादिर्विरुद्धः च प्रसंगश्च विरुद्धप्रसंगः, तेन नार्थमीहेतेति सम्बध्यते नत्र आवृत्तिः प्रत्येकं पर्युदासार्था। सर्वत्राप्यास्मिन्त स्नातकप्रकरणे नव्शब्दः पर्युदासार्थ एव। किञ्चिदर्थलाभेऽपि सन्तोषी परितुष्टो भवेत्, चकारात्संयतश्च- 'सन्तोषं परमास्थाय सुखार्थी संयतो भवेत् ॥' इतिमनुस्मरणात्।

**राजान्तेवासियाज्येभ्यःसीदनिच्छेद्धनं क्षुधा।**

**दम्भहेतुकपाषण्डिबकवृत्तींश्च वर्जयेत् ॥**

क्षुधा सीदन्पीड्यमानः स्नातको राज्ञो विदितवृत्तान्तात्, अन्तेवासिनो वक्ष्यमाणलक्षणात् याज्यात् याजनाहच्चि, धनमाददीत। क्षुधा सीदन्नित्यनेन विभागादिप्राप्तकुटुम्बपोषणपर्याप्तधनो न कुतश्चिदर्थमन्विच्छेदिति गम्यते। किं च

दम्भिहैतुकादीन्सर्वकार्येषु लौकिकशास्त्रीयेषु वर्जयेत्, चकाराद्विकर्मस्थबैडालव्रतिकान् पाषण्डिनो विकर्मस्थान्बैडालव्रतिकान् शठान्। शठान्। यथाह मनुः हैतुकान्बकवृत्तीश्च वाङ्मात्रेणापि नार्चयेत्॥ इति। लोकरञ्जनार्थमेव कर्मानुष्ठायी दम्भी, युक्तिबलेन सर्वत्र संशयकारी। हेतुकः, त्रैविद्यवृद्धपरिगृहीताश्रमिणः पाषण्डिनः, बकवदस्य वर्तनमिति बकवृत्तिः, यथाह मनुः - 'अधोदृष्टिर्नैकृतिकः स्वार्थसाधनतत्परः। शठो मिथ्याविनीतश्च बकवृत्तिरुदाहृतः॥' इति। प्रतिषिद्धसेविनो विकर्मस्थाः। बिडालो मार्जारस्तस्य स्वभावो व्रतं तद्यस्यासौ बिडालव्रतिकः, - धर्मध्वजी सदा लुब्धच्छाद्मिको लोकदाम्भिकः। बैडालव्रतिको ज्ञेयो हिंस्रः सर्वाभिसन्धकः॥ ' इति मनुस्मरणात्। शठः सर्वत्र वक्रः। एतैः संसर्गनिषेधादेव स्वयमेवंविधो न भवेदिति गम्यते॥

International Research Journal of Education and Technology
Peer Reviewed Journal
ISSN 2581-7795

References

1. याज्ञवल्क्यस्मृतिः, आचाराध्यायः – श्लो. – 8, पृ. - 3
2. याज्ञवल्क्यस्मृतिः, आचाराध्यायः – श्लोक – 9, पृ - 3
3. याज्ञवल्क्यस्मृतिः, आचाराध्यायः – मिताक्षराव्याख्या, पृ - 3
4. याज्ञवल्क्यस्मृतिः – आचाराध्यायः –उपोद्घातः – श्लो. 3 – पृ - 6
5. याज्ञवल्क्यस्मृतिः – आचाराध्यायः – उपोद्घातः (अपरार्कव्याख्याः) – पृ. - 3
6. याज्ञवल्क्यस्मृतिः – आचाराध्यायः – श्लो. - 118 – पृ. - 45
7. याज्ञवल्क्यस्मृतिः – आचाराध्यायः – श्लो. 118 व्याख्याः – पृ. - 45